# सन्देशः



**डा. टि. एस्. कृष्णमूर्तिः**
**निवृत्तः संस्कृतप्राध्यापकः भूतपूर्वः सदस्यश्च,**
**अध्ययनमण्डली सेनेट् च, बेङ्गलूरु विश्वविद्यालयः**

अयमस्ति अस्माकं महतो हर्षप्रकर्षस्य विषयः यत् बहुकालात् निरीक्षितस्य कर्णाटकसंस्कृतविश्वविद्यालयस्य आरम्भः ऐषमस्तने संवत्सरे समभवदिति । ततः वर्षाभ्यन्तर एव संस्कृतनिर्देशनालयोऽपि विश्वविद्यालयस्य आश्रये उद्घाटित इत्यस्माकमधिकतरः सन्तोषस्थानम् । द्वावपि इमौ कर्णाटकराज्यस्य सौभाग्यम् । अस्मिन् विषये कर्णाटकसर्वकारः धन्यवादार्हः ।
वार्तापत्रं मया सकुतूहलम् अवलोकितम् । तस्योपयोगितां समीक्ष्य नितरां हृतहृदयोऽस्मि । तस्मिन् प्रकाशितानां लेखानां गुणगरिमा स्वान्तं मे प्रतिपलं प्रसादयति । सुविख्यातानां संस्कृते निष्णातानां मनीषिणां पण्डितप्रवराणाञ्च परिचयोऽप्यस्मिन् भवतीति अस्माकं सन्तोषस्थानम् । ईदृशेन वार्तापत्रेण संस्कृतभाषायाः बलसंवर्धनम् अस्मिन् काले भवतीत्यस्माकमाशयः ।
सन्ति चाद्यापि एतादृशवार्तापत्रं पिपठिषवो विद्वांसः छात्राश्चेति भवदीयः श्रमः सार्थको जातः । रक्षापुटावपि रमणीयौ आकर्षकौ च स्तः ।

**स्वतन्त्रे भारते वर्षे वर्धतां नव्यशोभया ।**
**संस्कृता भारती रम्या रञ्जयन्ती मनांसि नः ॥**